दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिककृष्णप्रतिपदा-द्वितीया
कार्तिक 11 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-08 ■ वर्ष-6 ■ अङ्क-03 | 1 | अक्तूबर 27, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 धर्मशालायाः तपोवने १६ तः २१ नवम्बर यावत् भविष्यति विधानसभायाः शीतकालीनं सत्रम्, भविष्यन्ति षड् उपवेशनानि

4 दैनिक-संस्कृत-वार्तापत्रस्य 'हिमसंस्कृतवार्ता' इत्यस्य सफलानि पञ्चवर्षाणि धर्मशालायां सङ्गीतमय-सुन्दरकाण्डपाठस्य भव्यम् आयोजनम्

9 आधुनिकहिन्दीपत्रकारितायाः पुरोधसः पत्रकाराः वृजेशकुमारः

नवदेहल्यां द्वादशतमस्य ब्रिक्स-संसदीय-मञ्चस्य आरम्भः



नवदेहल्यां द्वादशतमस्य ब्रिक्स-संसदीय-मञ्चस्य आरम्भः अभवत्, यत् क्षेत्रीय-संघर्षाणां, आर्थिक-अस्थिरतायाः, भयोत्पादनस्य, ऋतुदशा-परिवर्तनस्य च विषयेषु केन्द्रितम् आसीत्। द्विदिवसीयस्य कार्यक्रमस्य अस्य उद्घाटनसत्रम् अभिसंबोधयन् लोकसभाध्यक्षः ओम बिरला वर्यः अवदत् यत्, संसदः परस्परसमन्वयं विश्वासं च सुदृढं कर्तुं, अन्ताराष्ट्रिय-समाह्वानं न्यूनीकर्तुं, वैश्विक-समाह्वानानां शान्तियुतं समाधानम् अन्वेष्टुं च महत्त्वपूर्णा भूमिकां निर्वहन्ति। श्रीबिरला-वर्यः क्षेत्रीय-संघर्षान्, युद्धान्, आर्थिक-अस्थिरतां, भयोत्पादनं, ऋतुदशा-परिवर्तनादि प्रमुख-समाह्वानानि उपस्थापितवान्। नागरिकाणां जीवनं परिष्कारयितुं, अधिकसमावेशी शान्तियुतविश्वाय च योगदानं प्रदातुं च उपायानां आवश्यकतायाः विषये सः अवधानं दत्तवान्। श्रीबिरला वर्येण विश्वासः प्रकटितः यत् अस्मिन् मञ्चे चर्चासु परस्परविश्वासस्य सहकारस्य च नूतनादिशा प्रदीयते तथा च जनकेन्द्रितविकासस्य सहभागित्वस्य प्रतिबद्धतां सुदृढी करिष्यति। सः अवदत् यत्, सहभागिनः देशाः मिलित्वा दृढसंसदीयसहभागित्वं निर्मातुं शक्नुवन्ति येन जनानां आकांक्षाः पूरयितुं साहाय्यं कुर्वन्तः शान्तिः, समृद्धिः, सुस्थिरविकासस्य च नूतनाः अवसराः कल्प्यन्ते।

भारतीय-लोकतन्त्रस्य शक्तिः संवादे, मतविविधतायां, परस्पर सम्माने च निहिता । भारतं लोकतन्त्रस्य जननीति सम्बोधयन् श्री बिरलावर्यः अवधानं दत्तवान् यत् भारतीय-लोकतन्त्रस्य शक्तिः संवादे, मतविविधतायां, परस्पर सम्माने च निहिता अस्ति। अस्मिन् लोकतान्त्रिकाधारे भारतं स्वस्य विकासयात्रायां निरन्तरं अग्रे गमयमानः अस्तीति सः अवोचत्। प्रधानमन्त्री नरेन्द्रमोदी अपि संसदभवनस्य संविधान-सदनस्य केन्द्रीय सभामण्डपे आयोजितस्य उद्घाटन-सत्रे भागम् अगृह्णात्। सः आगच्छतानां प्रतिनिधिमण्डलानां नेतृभिः सह अपि मिलितवान्। ततः पूर्व लोकसभायाः अध्यक्षः एकादश-ब्रिक्स् सदस्यराष्ट्राणां, दस-सहभागीराष्ट्राणां च संसदीयप्रतिनिधि-मण्डलानां नेतृणां स्वागतं विहितवान्। द्विदिवसीयः कार्यक्रमः अद्य समाप्यते।

प्रधानमन्त्रिणा नरेन्द्रमोदिना ब्राजील-देशस्य राष्ट्रपतिने लूयिस इनासियो लुला डा सिल्वा वर्याय निर्वाचनानन्तरम् अभिनन्दनं प्रेषितम्।

प्रधानमन्त्रिणा नरेन्द्रमोदिना ब्राजील-देशस्य राष्ट्रपतिने लूयिस इनासियो लुला डा सिल्वा वर्याय पुनः निर्वाचनानन्तरम् अभिनन्दनं प्रेषितम्। सामाजिकान्तर्जालीये श्रीमोदी अवदत् यत् सः राष्ट्रपतिना लुला-वर्येण सह बहु-पक्षीय-भारत-ब्राजील्-सामरिक सहभागित्वम् इतोऽपि सुदृढं कर्तुं च निकटतया कार्यं कर्तुम् उत्सुकः अस्ति।



ब्राजील् देशे वामदलस्य वर्तमानराष्ट्रपतिः लुला डा सिल्वा इत्येषः दक्षिणदलस्य प्रतिद्वन्द्वी फ़्लेवियो बोल्सोनारो इत्यमुं राष्ट्रपतिपदस्य निकटप्रतिस्पर्धायां निर्वाचने पराजितवान्।

अद्यतनीयं सुभाषितम्

नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम्।
आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः॥

(महाभारत, उद्योगपर्व 33.16)

भावार्थ- पण्डितबुद्धि वाले लोग अप्राप्य वस्तु की इच्छा नहीं करते, नष्ट हुई वस्तु का शोक नहीं करते और आपत्तियों में मोहित नहीं होते।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७११९ कार्यालयीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्तापः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकगणः- डॉ.अमलदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

रक्षा-अधिग्रहण-परिषदा सैन्यबलानां कृते द्वि-दशांश-द्वादशलक्षकोटि-रूप्यकाणां वित्तगत-अधिग्रहण-प्रस्तावाः अनुमोदिताः

रक्षामंत्रिणः राजनाथसिंहस्य अध्यक्षतायां रक्षा-अधिग्रहण-परिषदा (डी. ए. सी.) इत्यनेन प्रायः द्वादशसहस्राधिक द्विलक्षकोटिरूप्यकाणां अनुमानितव्ययेन रक्षा-बलानां विविध द्रव्य-अधिग्रहण-प्रस्तावं स्वीकृतम्। भारतीयसेनायाः कृते हाई-मोबिलिटी-वेहिकल्स् (एच्. एम्. वी.), सेल्फ-प्रोपेल्ड-ट्रैक्ड्-गन्-सिस्टम्, लाईट्-मल्टि-रोल-हेलिकाप्टर्स (एल्. एम्. आर्. एच्.), वेरी-शार्ट-रेञ्ज-एयर-डिफेन्स्-सिस्टम्, सर्विलान्स्-यू. ए. वी., इन्टेग्रेटेड्-सर्विलान्स्-एण्ड्-स्ट्राईक्-सिस्टम्, लॉन्ग-रेञ्ज-कामिकेज़-ड्रोन-सिस्टम् इत्यादीनां विविध-प्रणाल्यानां क्रयणार्थं अनुमतिः प्रदत्ता। उच्च-चलनशील-यानानि समाह्वानपूर्ण-भूभागेषु परिचालन-क्षमताम्, रसद-समर्थनं, चलनशीलतां च वर्धयन्ति। स्वप्रणोदित-ट्रैक्ड्-गन्-सिस्टम् इतीदं यान्त्रिक-विन्यासानां अनुरूपं चलनशीलतां अग्निशक्तिं च प्रददाति । लघु-बहु-उद्देशीय-उदग्र विमानानाम् उपयोगः भारतीयसेनया भारतीय वायुसेनया च निरीक्षणार्थं, युद्धार्थं, सैनिकानां अन्वेषणार्थं तथा उद्धारार्थं, मानवीयसहायतायै तथा आपद्-निवारणे च भविष्यति।

केन्द्र-सर्वकारेण रिलीफ-योजनायाः समयावधिः आगामी वर्षस्य मार्च-मासस्य एकत्रिंशत्-दिनाङ्कः यावत् प्रसारिता



पश्चिम-एशियायाम् अनुवर्तमानस्य भू-राजनैतिक सङ्कटस्य पृष्ठभूमौ केन्द्र-सर्वकारेण रिलीफ्-योजनायाः समयावधिः आगामी वर्षस्य मार्च-मासस्य एकत्रिंशत्-दिनाङ्क यावत् प्रसारिता। अस्याः योजनायाः मुख्यम् उद्देश्यं निर्दिष्ट-क्षेत्रेषु सम्प्रेष्यमाणाय भाण्डाय पञ्चनवति-प्रतिशतं विपत्-संरक्षणं प्रदाय भारतीय-निर्यातकान् भारतीय-निर्यात-ऋण-प्रत्याभूति-निगमात् बीमा-कवचं ग्रहीतुं प्रोत्साहयितुम् अस्ति।

केन्द्र-सर्वकारेण फ्लेक्स-फ्यूल-वाहनेषु ई-100 एथेनॉल इन्धनस्य प्रयोगः अनुमतः, शत-प्रतिशतं जैव-एथेनॉल-चालितानां वाहनानां मार्गः प्रशस्तो जातः



केन्द्रीय-मोटर-यान-नियम-ऊनाशीत्यधिक-एकोनविंशति शतम् इत्यस्य संशोधनस्य अन्तर्गतं, विशेषतया विभिन्नैः इन्धनैः चालयितुं परिकल्पितेषु वाहनेषु ई-100 इथेनाल्-इन्धनस्य उपयोगाय सर्वकारेण अनुमतिः प्रदत्ता। मार्गपरिवहन राजमार्ग-मन्त्रालयः अस्मिन् विषये राजपत्र-सूचनां प्रसारितवान्।

मन्त्रिमण्डल-सचिवस्य अध्यक्षतायां राष्ट्रीय-सङ्कट-प्रबन्धन समित्याः उपवेशनम्



चक्रवातमन्त्रिपरिषदः सचिवः डा. टी. वी. सोमनाथन् वर्यः बङ्गाल-खात्याः आसन्न चक्रवातस्य सज्जतायाः समीक्षार्थं राष्ट्रिय-सङ्कट-व्यवस्थापन समित्याः सभायाः अध्यक्षतां कृतवान्। सभायां सूचितं यत् पर्याप्तानि आश्रयस्थानानि निर्गमनव्यवस्थाः च कृताः सन्ति, तथा च आवश्यकानि एन्. डी. आर्. एफ़. तथा एस्. डी. आर्. एफ्. दलानि स्थापितानि सन्ति। मण्डल-नियन्त्रण-कक्षः अपि सक्रियः अभवत्।

धर्मशालायाः तपोवने १६ तः २१ नवम्बर यावत् भविष्यति विधानसभायाः शीतकालीनं सत्रम्, भविष्यन्ति षड् उपवेशनानि

हिमसंस्कृतवार्ताः- शिमला। हिमाचल-विधानसभायाः शीतकालीनं सत्रं १६ तः २१ नवम्बर दिनाङ्कयोः मध्ये भविष्यति। धर्मशालायां सम्पद्यमानेऽस्मिन् शीतसत्रे षड् (६) उपवेशनानि निर्धारितानि सन्ति। विधानसभाध्यक्षस्य राज्यसर्वकारस्य च प्रस्तावाय अद्य अवकाशदिने एव लोकभवनेन स्वीकृतिः प्रदत्ता। अधुना मङ्गलवासरे विधानसभातः अस्मिन् सन्दर्भे अधिसूचना निर्गमिष्यति। अधिसूचनायाः प्रकाशनेन सहैव विधायकाः अस्य सत्रस्य कृते प्रश्नान् अन्यान् च विषयान् दातुं शक्नुवन्ति।

हिमाचलसर्वकारेण गते वर्षेऽपि नवम्बरमासे एव शीतकालीनं सत्रम् आयोजितम् आसीत्। अस्मिन् सत्रेऽपि नवम्बरमासे एव इदं सत्रं विधीयते। राज्यसर्वकारेण तर्कः दत्तः यत् दिसम्बरमासे नूतनवर्षस्य पर्यटकानाम् आगमनर्तुम् अवलोक्य सत्रं पूर्वमेव क्रियते, येन विशिष्टजनानां गमनागमनेन (वीआईपी' आवागमनेन) व्यावसायिकानां व्यवसायः बाधितः न स्यात्। यद्यपि षड्दिवसानाम् उपवेशनानन्तरम् अपि अस्मिन् वर्षे विधानसभायाः कुल-उपवेशनानां निर्धारितं लक्ष्यं पुनः सम्पूर्णं न भविष्यति।

विधानसभाध्यक्षः सम्प्रति देहली-प्रवासे वर्तते, प्रत्यागमनानन्तरं सः धर्मशालां गत्वा शीतकालीनसत्रस्य सज्जतानां समीक्षां करिष्यति। नवम्बरमासस्य अन्तिमे सप्ताहे अथवा दिसम्बरमासे केन्द्रीयगृहमन्त्रिणः अध्यक्षतायां सम्पद्यमाना 'उत्तरीक्षेत्र- परिषदः' गोष्ठी अपि आगमिष्यति। अत एव राज्यसर्वकारः सत्रात् पूर्वमेव कार्यमुक्तः भवितुम् इच्छति। इदं शीतकालीनं सत्रम् अस्य वर्षस्य अन्तिमं सत्रं भविष्यति।



अंशविपणिसमाचारः भारतीयशेयरविपण्यां पुनरुत्थानं दृष्टम्

हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, मुम्बई, २६ अक्टूबर २०२६।

भारतीयशेयरविपण्यां सोमवासरे प्रारम्भिके आरोहावरोहे, अवनतौ अनन्तरं व्यापारस्य अन्तिमचरणे च उल्लेखनीयः सुधारः परिलक्षितः। बम्बई-शेयरविपण्याः सेन्सेक्ससूचकाङ्कः ४८३ .९२ अङ्कैः वर्धमानः७३६०६.७५ इति हरितचिह्ने आगत्य व्यवसायदिवसस्य समापनं कृतवान्। राष्ट्रिय-शेयर- विपण्याः निफ्टी-सूचकाङ्कः अपि पुनः १५३.२० इति सुदृढतां प्राप्य २२,७५३.२० अङ्केषु स्थित्वा व्यवसायदिवसस्य समापनं कृतवान्।

अद्यतनव्यवसाये धातुक्षेत्रे स्वास्थ्यसेवा-औषधनिर्माणक्षेत्रे च निवेशकानां क्रयप्रवृत्तिः विशेषरूपेण दृष्टा। निफ्टी-धातुसूचकाङ्कः २.२१ प्रतिशतं तथा निफ्टी-औषधनिर्माणसूचकाङ्कः १.७६ प्रतिशतं वर्धितः। एतयोः क्षेत्रयोः प्रबलक्रयणेन विपण्याः पुनरुत्थाने महत्त्वपूर्णं योगदानं कृतम्।

सेन्सेक्ससूचकाङ्कस्य प्रमुखसंयत्रेषु अडानी पोर्ट्स, कोटक महिन्द्रा बैंक, ट्रेण्ट, टाटा स्टील, भारती एयरटेल, आईटीसी इत्येतेषाम् अंशमूल्यानि उल्लेखनीयरूपेण वर्धितानि। एतेषु अंशेषु निवेशकानां क्रयप्रवृत्त्या विपण्यां सकारात्मकं वातावरणं निर्मितम्। अपि च लाभांशस्य सुरक्षितीकरणार्थं कृतया लाभप्राप्तप्रक्रियया विक्रयप्रभावेन च बजाज फाइनान्स, एचडीएफसी बैंक, मारुति सुजुकी, एचसीएल टेक्नोलॉजीज तथा पावर ग्रिड इत्येतेषां शेयरमूल्येषु अवनतिः अभवत्। अन्ताराष्ट्रिये विपण्यां अपरिष्कृततैलस्य मूल्यानाम् उन्नतावनतिः, अस्मिन् सप्ताहे अमेरिकी- फेडरल- रिजर्व-संस्थायाः, यूरोपीय- केन्द्रीय- वित्तकोषस्य, जापानवित्तकोषस्य च सम्भाविताः मौद्रिकनीतिविषयकाः निर्णयाः निवेशकानां ध्यानस्य केन्द्रे सन्ति। एतेषां वैश्विकघटनाक्रमाणां प्रभावः भारतीयशेयरविपण्याः आगामीदिवसेषु अपि भवितुम् अर्हति।

सतर्कता-जागृति-सप्ताहस्य आयोजनम्

सार्वजनिकजीवने सत्यनिष्ठां प्रवर्तयितुं भ्रष्टाचारमुक्तं समाजं निर्मातुं च अद्यारभ्य अग्रिममासस्य प्रथमदिनाङ्कपर्यन्तं सम्पूर्ण देशे सतर्कता जागृति-सप्ताहः आचर्यते। प्रशासनस्य लोकप्रशासनस्य च नैतिकतायाः पारदर्शितायाः च महत्त्वस्य विषये जागरणं जनयितुं अस्य आचरणस्य उद्देश्यः वर्तते। अस्मिन् वर्षे "समृद्धेः संभाव्यता" इति विषये सतर्कता-जागृति सप्ताहः आचर्यते। राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री च सतर्कता-जागृति-सप्ताहस्य सफलतया आचरणाय शुभाशयाः प्रेषितवन्तः। राजस्थान-सर्वकारेण चतुर्दश-जनपदानाम् अशीति-उपमण्डल-क्षेत्राणि अनावृष्टि-ग्रस्तानि घोषितानि



वाल्मीकि-मन्दिराय २५ लक्षरूप्यकाणि, पात्र-स्वच्छता-कर्मचारिभ्यः गृहाय त्रीणि लक्षरूप्यकाणि; मुख्यमन्त्रिणः घोषणा



हिमसंस्कृतवार्ताः- शिमला।
महर्षिवाल्मीकिजयन्त्याः अवसरे मुख्यमन्त्री ठाकुर-सुखविन्दरसिंहसुक्खू-महोदयः शिमलायाः कृष्णानगरस्थिते भगवतो वाल्मीकेः मन्दिरे शिरोऽवनम्य प्रणामं कृतवान्, प्रदेशवासिभ्यश्च जयन्त्याः शुभाशयान् प्रादात्। अस्मिन् अन्तराले सः मन्दिराय पञ्चविंशतिलक्ष (२५ लक्ष) रूप्यकाणाम् आर्थिकसाहाय्यं प्रदातुं घोषणां कृतवान्। मुख्यमन्त्रिणा वाल्मीकिसमुदायस्य कल्याणाय उत्थानाय च सर्वकारस्य कटिबद्धता अपि पुनरुच्चारिता।

मुख्यमन्त्री अवदत् यत् महर्षिर्वाल्मीकिः भारतस्य सांस्कृतिक्याः, साहित्यिकायाः, आध्यात्मिकायाश्च परम्परायाः महान् प्रतीकः वर्तते। रामायणस्य निर्माणमाध्यमेन सः मानवतायै सत्यस्य, न्यायस्य, करुणायाः, त्यागस्य, कर्तव्यस्य च सन्देशं दत्तवान्, यः अद्यापि समाजं मार्गदर्शयति। तेनोक्तं यत् विकासः तदैव सार्थकः भवति, यदा समाजस्य प्रत्येकस्मिन् वर्गे समानावसराः प्राप्यन्ते, कोऽपि जनः सामाजिक्या आर्थिक्या वा काठिन्येन कारणेन पश्चात् न तिष्ठेत्। सः प्रावोचत् यत् काङ्ग्रेस-दलं संविधाने तस्य मूल्येषु च विश्वसिति, तथा च प्रदेशसर्वकारः सामाजिकन्यायं, समानतां, प्रत्येकस्य जनस्य गरिमां च निश्चेतुं कटिबद्धः अस्ति।

पात्र-स्वच्छताकर्मचारिभ्यः गृहनिर्माणाय ३ लक्षरूप्यकाणि

मुख्यमन्त्री अवदत् यत् सर्वकारस्य लक्ष्यं प्रत्येकस्मै परिवाराय सम्मानजनकजीवनं, श्रेष्ठां शिक्षां, स्वावलम्बिनः भवितुम् अवसराणां समुपलब्धता च वर्तते। अनेनैव उद्देश्येन प्रदेशसर्वकारेण 'महर्षि-वाल्मीकि- कामगार- आवासयोजना' प्रारब्धा अस्ति। अस्यान्तर्गततया पात्रेभ्यः वाल्मीकिसमुदायस्य स्वच्छताकर्मचारिभ्यः सुदृढगृहनिर्माणार्थं त्रिलक्ष (३ लक्ष) रूप्यकाणाम् आर्थिकसाहाय्यं दीयते।

योजनायाः लाभं ग्रहीतुं परिवारस्य वार्षिकी आयः सार्धद्विलक्ष (२.५ लक्ष) रूप्यकेभ्यः न्यूना भवेत्। अनेन सहैव परिवारस्य पार्श्वे स्वकीयं सुदृढगृहं न भवेत्। सर्वकारस्य अस्य उपक्रमस्य उद्देश्यं पात्रपरिवारेभ्यः सुरक्षितम् आवासं समुपलब्धं कारयितुम् अस्ति।

माइक्रोलाइट'-विमानेन उड्डयनं करिष्यन्ति हिमाचलस्य एनसीसी-छात्रसैनिकाः (कैडेट्स), मुख्यमन्त्रिणा सुक्खूमहोदयेन भुन्तरे कृतम् 'एयर विङ्ग हैङ्गर'-इत्यस्य उद्घाटनम्



हिमसंस्कृतवार्ताः- कुल्लू। हिमाचलप्रदेशस्य एनसीसी-वायुसेना-प्रभागस्य (एयर-विङ्ग) छात्रसैनिकानां (कैडेट्स) कृते महान् उपहारः सम्प्राप्तः। अधुना प्रदेशस्य छात्रसैनिकानां कृते विमानचालनस्य प्रशिक्षणं ग्रहीतुम् अन्यस्थलेषु गन्तव्यं न भविष्यति। कुल्लू- मण्डलस्य भुन्तरस्थिते कुल्लू-मनाली-विमानपत्तने एनसीसी-वायुसेना-प्रभागस्य 'हैङ्गर' (विमानशाला) सज्जीकृता अस्ति। मुख्यमन्त्रीमहोदयः सोमवासरे अस्य उद्घाटनम् अकरोत्।

सः विमाने उपविश्य अस्य निरीक्षणं कृतवान्। जलतोपेन (वाटर-कैनन) तस्य स्वागतं विहितम्। अस्याः सुविधायाः प्रारम्भेण प्रदेशस्य छात्रसैनिकाः स्थानीयस्तरे एव 'माइक्रोलाइट्' विमानस्य माध्यमेन उड्डयनप्रशिक्षणं प्राप्तुम् अवसरं लप्स्यन्ते।

प्रशिक्षणसंरचनायै सुदृढता

भुन्तर-विमानपत्तने विमानशालायाः (हैङ्गर) निर्माणेन एनसीसी-वायुसेना-प्रभागस्य प्रशिक्षणसंरचना सुदृढा भविष्यति। वैमानिकीसम्बद्धे व्यावहारिकप्रशिक्षणे छात्रसैनिकाः उड्डयनविषयिणीं तान्त्रिकसूचनां विमानसञ्चालनस्य चानुभवं प्राप्तुम् अवसरं लभन्ते। अधुना कुल्लौ अस्याः सुविधायाः उपलब्ध्या छात्रसैनिकाः प्रशिक्षणार्थम् अन्यस्थलेषु आश्रिताः न भविष्यन्ति।

वैमानिकीक्षेत्रे संवर्धिष्यते अभिरुचिः-

हिमाचलप्रदेशस्य तरुणेभ्यः (युवकेभ्यः) अयम् उपक्रमः वैमानिकीक्षेत्रे अभिरुचिं विकासयितुं प्रशिक्षणस्य च नूतनावसरान् समुपलब्धं विधातुं दिशि महत्त्वपूर्णः मन्यते। एनसीसी-माध्यमेन छात्रसैनिकेषु अनुशासनं, नेतृत्वक्षमतां, तान्त्रिकावबोधं च विकासयितुं बलं दीयते।

तरुणेभ्यः सौविध्यम्-

उड्डयनप्रशिक्षणेन ते एतैः गुणैः सह वैमानिकीप्रवृत्तीनां व्यावहारिकम् अनुभवम् अपि प्राप्तुं शक्ष्यन्ति। भुन्तरे 'हैङ्गर' सुविधायाः विकासेन प्रदेशस्य एनसीसी-वायुसेना-प्रभागस्य छात्रसैनिकानां कृते प्रशिक्षणव्यवस्थां स्थानीयस्तरे सुदृढीकर्तुं मार्गः प्रशस्तः जातः। अनेन कुल्लू-क्षेत्रं वैमानिकी- प्रशिक्षण- प्रवृत्तीनाम् एकस्य महत्त्वपूर्णस्य केन्द्रस्य रूपेणापि उद्गन्तुं शक्नोति।

यथैव भाग्यस्य कुण्डली उद्घाटयिष्यति, सुन्दरठाकुरः भविष्यति मन्त्री- मुख्यमन्त्री सुक्खू महोदयः

हिमसंस्कृतवार्ताः- कुल्लू।विधायकं सुन्दरठाकुरं मन्त्री विधातुं पृष्टे प्रश्ने मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः अवदत् यत् यदा भाग्यस्य कुण्डली उद्घाटयिष्यति (प्रस्फुटिष्यति), तदनुसारेणैव सः मन्त्रिरूपेण नियोजयिष्यते। मुख्यमन्त्रिणा कुल्लू-मण्डलस्य मौहल-स्थले पत्रकारैः सह अनौपचारिकायां वार्तायां सत्याम् इदं प्रतिपादितम्। सः अवदत् यत् सः गतात् एकाब्दात् (एकवर्षात्) सुन्दरठाकुरं मन्त्रिपदे नियोजयितुं वार्तां करोति। अधुना शीघ्रमेव सुन्दरठाकुरः मन्त्री विधास्यते।

रविः खरिडेहालः - बेङ्गलूरु।

"वर्धमानस्य चलजनसङ्ख्यायाः आवश्यकतानां पूर्तये सार्वजनिकयानस्य अवसरः अस्ति"

आन्तरिकयात्रायाः आन्तरिकपर्यटनस्य च प्रथमं सर्वभारतीयं सर्वेक्षणं कृतम् ।

सर्वेक्षणं एन-एस-ओ कार्यालयेन इत्युक्ते "राष्ट्रिय-सांख्यिकीय-कार्यालयेन" कृतम्। सर्वेक्षणं जुलाई २०२५ तः जुलाई २०२६ पर्यन्तं कृतम् । सर्वेक्षकाः १४,२७४ ग्रामान् १०,३७७ नगरखण्डान् च आच्छादितवन्तः । तस्मिन् सर्वेक्षणे २० लक्ष व्यक्तिभिः सह ५ लक्षं गृहाणि समाविष्टानि सन्ति । एतेषां प्रतिवेदनानुसारं यात्रागुणाः, यात्राभ्यासाः च अत्यन्तं आश्चर्यजनकाः सन्ति ।

प्रतिवेदनेषु आन्तरिकयात्रायाः, आन्तरिकपर्यटनस्य च व्ययः अपि प्रदत्तः भवति ।

निष्कर्षाः सूचयन्ति यत् निजी-व्यक्तिगत-यानयोः अधिकं आश्रयः अस्ति ।

सार्वजनिकयानस्य यात्रिकस्य योजनासु प्रवेशस्य आवश्यकता वर्तते।

कार्यं कर्तुं यात्रिकाणां मध्ये केवलं १५% जनाः सार्वजनिकयानस्य उपयोगं कुर्वन्ति । प्राधान्यं मार्गपरिवहनं भवति यत्र ४२.६% २ चक्रीयवाहनानां, ३% ४ चक्रीयवाहनानां च उपयोगं कुर्वन्ति । जनाः अपि पादचारेण , द्विचक्रिकायानेन वा त्रिचक्रिकायानभाडेन गृह्णन्ति । आवासनियोजकानाम् परिवहनप्रदातृणां च कृते प्रतिवेदनं उपयोगी भवति।

दैनिक-संस्कृत-वार्तापत्रस्य 'हिमसंस्कृतवार्ता' इत्यस्य सफलानि पञ्चवर्षाणि
धर्मशालायां सङ्गीतमय-सुन्दरकाण्डपाठस्य भव्यम् आयोजनम्

❑अक्तूबर-मासस्य २५ दिनाङ्के २०२१ तमे वर्षे डिजिटल-संस्कृत-वार्ता-पत्रस्य आरम्भः अभवत्

❑समग्रे देशे लक्षशः पाठकानां समीपं प्राप्नोति दैनिकवार्तापत्रम्

❑संस्कृत-प्रचार-प्रसारस्य तथा च डिजिटल-पत्रकारितायाः नूतनान् आयामान् स्थापयति 'हिमसंस्कृतम्-न्यासः'



धर्मशाला, २६ अक्तूबर (प्रतिनिधिः):

हिमाचलप्रदेशात् निरन्तरं प्रकाश्यमानस्य देशस्य प्रतिष्ठितस्य दैनिक-संस्कृत-वार्तापत्रस्य 'हिमसंस्कृतवार्ता' इत्यस्य सफल-पञ्च-वर्ष-पूर्तेः उपलक्ष्ये हिमसंस्कृतम्-न्यासेन धर्मशालायाः न्यायालय-परिसरस्थे (कचहरीस्थे) प्रसिद्धे हनुमन्मन्दिरे भव्यः सङ्गीतमयः सुन्दरकाण्डपाठः आयोजितः। वाल्मीकिजयन्त्याः पावनपर्वणि आयोजितेऽस्मिन् गरिमामये कार्यक्रमे नगरस्य अनेके गण्यमान्याः नागरिकाः, विद्वांसः, संस्कृतप्रेमिणश्च समुपस्थिताः आसन्। अस्मिन् अवसरे वार्तापत्रस्य प्रधानसम्पादकेन डॉ. अमनदीपशर्मणा विस्तरेण प्रतिपादितं यत् २०२१ तमस्य वर्षस्य अक्तूबर-मासस्य २५ दिनाङ्के निष्ठावतां संस्कृतशिक्षकाणां सहकारेण 'हिमसंस्कृतवार्ता' इति डिजिटल-दैनिकवार्तापत्रस्य आधारशिला स्थापिता आसीत्। तदारभ्य अद्यपर्यन्तम् इदं वार्तापत्रम् अविघ्नतया प्रतिदिनं डिजिटल-स्वरूपेण प्रकाश्यते, यत् हिमसंस्कृतम् इत्यस्य आधिकारिके जालपुटके (वेबसाइट्-मध्ये) नियमिततया प्रसार्यते। वर्तमाने इदं वार्तापत्रं देशस्य सहस्रशः कर्मठसदस्यानां योगदानेन प्रतिदिनं लक्षशः पाठकैरध्ययते। अस्मिन् देशस्य विख्यातानां संस्कृतविश्वविद्यालयानां सहितानाम् आधुनिकमहाविद्यालयानां विद्यालयानां च शैक्षणिक-सांस्कृतिक-गतिविधीनां वार्ताः प्राधान्येन प्रकाश्यन्ते।

प्रधानसम्पादकः अस्यां यात्रायां साहाय्यं कृतवतां प्रमुखसदस्यानां प्रति कृतज्ञतां व्याहरन् डॉ. मनोजशैलस्य, डॉ. अमितशर्मणः, डॉ. नरेन्द्रराणास्य, डॉ. पद्मनाभशर्मणः, डॉ. शिवकुमारस्य, शिवाशर्मणः, कुन्दनशर्मणः, वत्सदेशराजस्य तथा अन्यराज्येभ्यः सम्बद्धानां सहयोगिसदस्यानां—गुजरातात् जगदीशडाभी-महोदयस्य, असमराज्यात् नारदोपाध्यायस्य, महाराष्ट्रात् सुधासाठ्ये-वर्यायाः डॉ. वर्षाटोणगांवकर-वर्यायाश्च, बिहारात् राघवनाथझा-महोदयस्य डॉ. विमलेशझा-महोदयस्य च, उत्तरप्रदेशात् सत्येन्द्रमिश्रस्य वृजेशपाण्डेयस्य च तथा मध्यप्रदेशात् डॉ. रेणुकाबोरकार-वर्यायाः अमूल्ययोगदानस्य भूरिशः प्रशंसां कृतवान्।

संस्कृतपत्रकारिताः अवसराः आव्हानानि च

डॉ. अमनदीपशर्मा संस्कृतपत्रकारितायाः वर्तमानपरिदृश्ये स्वविचारान् प्रकटयन् अवदत् यत् संस्कृतं सर्वासाम् भारतीयभाषाणां जननी अस्ति, किन्तु आधुनिकपाठ्यक्रमे भाषाणाम् अतिभारेण कारणेन इयम् उपेक्षां सहते। हिमाचलप्रदेशस्य विद्यालयेषु संस्कृतविषयस्य अनिवार्यतायां सत्यामपि समाजे अस्य व्यावहारिकः प्रयोगः अपेक्षितस्तरे न दृश्यते, यस्य मुख्यं कारणं भाषायाः प्रचार-प्रसारस्य न्यूनता वर्तते। एतदर्थमेव सामान्यदैनिकवार्तावत् संस्कृतवार्तापत्रस्य प्रकाशनम् आरब्धं येन विद्यालयानां दैनिकप्रार्थनासभासु संस्कृतवार्तावाचनाय छात्राः प्रामाणिकसामग्रीं प्राप्नुयुः तथा च समाजे संस्कृतशब्दावल्याः व्यापकः विस्तारः भवेत्।सः वित्तीय-आव्हानानां विषये वदन् प्रावोचत् यत् सीमितानां संसाधनानां धनाभावस्य च अनन्तरमपि डिजिटलमाध्यमं पर्यावरणसंरक्षणं (पत्ररक्षण-अभियानं) च प्राधान्ये संस्थाप्य इदं डिजिटल-स्वरूपेण सञ्चाल्यते। अस्य सुचारु-सञ्चालनाय 'हिमसंस्कृतम्-न्यासस्य' रचना कृता अस्ति, यदन्तर्गतं संस्कृतशिक्षकाः पूर्णतया अवैतनिकरूपेण स्वसेवाः समर्पयन्ति। न्यासेन डिजिटलमाध्यमैः संस्कृतविदुषां साक्षात्काराणां तथा च स्थानीय-पार्वतीय-कवि-लेखकानां प्रोत्साहनाय 'पहाड़ी गल्लां' इत्यादयः अभिनवप्रकल्पाः अपि साफल्येन सञ्चाल्यन्ते। कार्यक्रमस्य सफलसहयोगे धर्मशलानगरतः कनेड़ विद्यालयस्य प्रधानाचार्या संजना कुमारी, आईटीएसशिक्षकः हिमांशुशर्मा, लोकनिर्माणविभागस्य अश्वनी कुमारपालिया, राकेशकुमारः, पंकजकुमारः, पालमपुरतः रजनीशर्मा, धर्मशालातः अश्वनी शर्मा, शौर्या इत्यादीनां योगदानं हिमसंस्कृतम् न्यासेन प्रशंसितः।



खडगे-महोदयस्य वक्तव्ये राजकीयः सङ्ग्रामः; प्रधानमन्त्रिणः विरुद्धं टिप्पण्यां भाजपा-पक्षेण देशव्यापी विरोध-प्रदर्शनं कृतम

काङ्ग्रेस-अध्यक्षस्य मल्लिकार्जुन-खडगे-महोदयस्य "मोदी किं, तस्य पिता अपि गमिष्यति" इति वक्तव्यम् अधिकृत्य भारतीय-जनता-पक्षः (भाजपः) सोमवासरे देशव्यापि-प्रदर्शनम् अकरोत्। बिहारस्य राजधान्यां पटनानगरे भाजपस्य महानगर-घटकेन खडगे-महोदयस्य वक्तव्यस्य विरोधः कृतः। लखनऊनगरे अपि भाजपा-कार्यकर्तृभिः विरोध-प्रदर्शनं कृतम्। अस्मिन् समये भाजपा-विधायकः नीरज-बोरा-महोदयः अपि उपस्थितः आसीत्। भाजपा-कार्यकर्तारः खडगे-महोदयस्य क्षमायाचनायाः याचनाम् अकुर्वन्। अपरपक्षे काङ्ग्रेस-पक्षस्य बहवः नेतारः अस्मिन् विषये स्पष्टीकरणं दत्त्वा खडगे-महोदयस्य पक्षसमर्थनं कुर्वन्ति। खडगे-महोदयेन रविवासरे पटनानगरे काङ्ग्रेस-पक्षस्य कार्यक्रमे एतत् वक्तव्यं दत्तम् आसीत्। सः त्रिवारम् एतत् वचनं पुनरुक्तवान्। कार्यक्रमे कस्मिंश्चित् जनेन "प्रधानमन्त्री कुत्रापि न गमिष्यति" इति उक्ते सति खडगे-महोदयः एतादृशीं टिप्पणीं कृतवान्। ततः परं तत्र उपस्थिताः जनाः तस्य जनस्य ताडनम् अकुर्वन्। इममेव विषयम् अधिकृत्य बिहारस्य पटनानगरे अभियोगः (FIR) पञ्जीकृतः अस्ति।

अपरत्र जम्मूनगरे भाजपा-कार्यकर्तारः दलस्य विधायिकायाः शगुन-परिहार-वर्यायाः भारतीय-जनता-युवा-मोर्चा (भाजयुमो)-दलस्य जम्मू-कश्मीर-अध्यक्षस्य अरुण-प्रभातस्य च नेतृत्वे डोगरा-चौक-स्थाने विरोध-प्रदर्शनम् अकुर्वन्। ते काङ्ग्रेस-पक्षस्य विरुद्धं जयघोषाणि अकुर्वन्, खडगे-राहुल-गान्धिनोः चित्रफलकानि (पोस्टर) च अदहन्। तथैव साम्बा, कठुआ, पुञ्छ, उधमपुर, राजौरी, डोडा, किश्तवाड, रियासी इत्यादिषु जनपदेषु अपि विरोध-प्रदर्शनानि कृतानि। कर्णाटकस्य राजधान्यां बेङ्गलूरुनगरे भाजपा-नेतारः 'फ्रीडम पार्क' इत्यत्र विरोध-प्रदर्शनम् अकुर्वन्।

डीएवी-राष्ट्रिय-क्रीडामहोत्सवे

भागलपुरडीएवीविद्यालयस्य छात्राःपदकद्वयं प्राप्तवत्यः



भागलपुर,दिनाङ्कः - २६-१०-२०२६

हिमसंस्कृतवार्ताः- डॉ विमलेश झा। बिहारप्रदेशस्य

डीएवीपब्लिकस्कूलबरारीभागलपुरविद्यालयस्य छात्राः डीएवी-राष्ट्रिय-क्रीडामहोत्सव-२०२६ इत्यत्र उत्कृष्टं प्रदर्शनं कृत्वा विद्यालयस्य भागलपुरनगरस्य च गौरवं वर्धितवन्तः। अस्यां प्रतियोगितायां विद्यालयस्य छात्रा श्रेया श्री भारोत्तोलनस्पर्धायां स्वर्णपदकं प्राप्तवती, अपि च चतुर्दशवर्षेभ्यः न्यूनवयस्कानां बालिकानां पादकन्दुकदलेन कांस्यपदकं प्राप्तम्। एताभ्यां उपलब्धिभ्यां विद्यालयपरिवारे हर्षोल्लासस्य वातावरणं वर्तते। ग्रेटर नोएडास्थिते मलखपुर-क्रीडाङ्गणे आयोजितायां डीएवी-राष्ट्रिय-क्रीडाप्रतियोगितायां श्रेया श्री बालिकानाम् ऊनविंशतिवर्षीयवर्गस्य भारोत्तोलनस्पर्धायां त्रिपञ्चाशत् किलोग्राम इत्यस्मात् न्यूनभारवर्गे प्रथमस्थानं प्राप्तवती। सा स्नैचविधिना द्वात्रिंशत् किलोग्राम तथा क्लीनएण्डजर्कविधिना चत्वारिंशत् किलोग्राम इति भारम् उत्थापितवती। एवं सा समग्रतया द्विसप्ततिः किलोग्रामभारम् उत्थाप्य स्वर्णपदकं विजितवती। इतोऽपि, नवदिल्लीस्थिते चिल्ला-क्रीडासङ्कुले आयोजितायां प्रतियोगितायां चतुर्दशवर्षेभ्यः न्यूनवयस्कानां बालिकानां पादकन्दुकदलेन उत्कृष्टं प्रदर्शनं कुर्वता कांस्यपदकं प्राप्तम्। दलस्य एषा सफलता विद्यालयस्य क्रीडोपलब्धिषु अन्यदेकं गौरवपूर्णम् अध्यायं संयोजितवती। उभे अपि उपलब्धी कठिनपरिश्रमस्य, नियमिताभ्यासस्य, अनुशासनस्य, दृढसङ्कल्पस्य तथा क्रीडाभावनायाश्च फलस्वरूपे स्तः। एतासु क्रीडाप्रतियोगितासु अनुरक्षकशिक्षकरूपेण श्रीकौशलकुमारः तथा सुश्री लवलीकुमारी च महत्त्वपूर्णां भूमिकां निर्वहन्तौ आस्ताम्।

विद्यालयस्य प्राचार्यः सहायक क्षेत्रीय अधिकारी च श्री अनिलकुमारः स्वर्णपदकविजेत्र्यै श्रेयाश्रियै तथा कांस्यपदकविजेत्रे बालिकापादकन्दुकदलाय च हार्दिकं वर्धापनं समर्पितवान् तथा तासाम् उज्ज्वलभविष्याय शुभकामनाः अयच्छत्। सः अवदत् यत् क्रीडाः छात्रेषु अनुशासनस्य, आत्मविश्वासस्य, धैर्यस्य, नेतृत्वक्षमतायाः तथा सहयोगभावनायाश्च विकासं कुर्वन्ति। राष्ट्रियस्तरीयप्रतियोगितासु प्राप्ताः एताः उपलब्धयः अन्यान् छात्रान् अपि क्रीडाक्षेत्रे उत्कृष्टतां प्राप्तुं प्रेरयिष्यन्ति।विद्यालयस्य क्रीडाशिक्षकः श्री प्रमोदकुमारमण्डलः, श्री देवाशीषभारती च अन्ये शिक्षकाः शिक्षिकाः तथा समस्तविद्यालयपरिवारः एताभिः उपलब्धिभिः हर्षं प्रकटयन्तः सर्वेभ्यः विजेतृभ्यः हार्दिकं वर्धापनं समर्पितवन्तः। ते च भविष्ये अपि सफलतायाः नूतनानि शिखराणि प्राप्तुं ताभ्यः शुभाशयाः प्रदत्तवन्तः। डीएवी पब्लिक स्कूल, बरारी इत्यस्य एताः उपलब्धयः शैक्षणिकोत्कृष्टतया सह क्रीडाक्षेत्रेऽपि विद्यालयस्य प्रतिबद्धतायाः प्रतिभायाश्च परिचायिकाः सन्ति। एताः सफलताः विद्यालयस्य अन्यान् छात्रान् अपि प्रेरयिष्यन्ति तथा स्वप्रतिभायाः विकासाय क्रीडाक्षेत्रे निरन्तरं प्रयतितुं प्रोत्साहयिष्यन्ति।

'चलन्तु देहलीम्!' 'इण्डिया' मैत्रीकूटस्य महारैली-प्रदर्शनार्थम् अल्कालाम्बा-महोदयया शिमलायां विमोचितं भित्तिपत्रम्

हिमसंस्कृतवार्ताः- शिमला।

नवदेहल्यां प्रथम नवम्बर दिनाङ्के आयोज्यमानायाः 'इण्डिया' मैत्रीकूटस्य प्रस्तावित- महासभायाः सन्दर्भे महिलाकाङ्ग्रेसदलस्य राष्ट्रियाध्यक्षा अल्का लाम्बा महोदया हिमाचलप्रदेशस्य समर्थनं याचितवती। सहैव महारैली-प्रदर्शनं पुरस्कृत्य 'चलन्तु देहलीम्' इति भित्तिपत्रम् अपि काङ्ग्रेस-प्रदेशमुख्यालये शिमलास्थिते राजीवभवने विमोचितवती। सोमवासरे आयोजितायां वार्ताहरगोष्ठ्यां राष्ट्रियाध्यक्षा अल्का लाम्बा प्रावोचत् यत् प्रथमे नवम्बर दिनाङ्के सम्पद्यमानायां महासभायां देशस्य विविधराज्येभ्यः दश लक्षं जनाः सम्मिलिताः भविष्यन्ति। तया उक्तं यत् अद्य देशस्य लोकतन्त्रं सङ्कटापन्नं वर्तते, एतादृशासु परिस्थितिषु विपक्षः शान्तः स्थातुं न शक्नोति। तया आरोपः कृतः यत् सर्वकारः विपक्षस्य ध्वनिं शमयितुं प्रयतते, किन्तु विपक्षः स्वकीयं जन- आन्दोलनं कदापि न समापयिष्यति।अल्का-लाम्बामहोदया अवदत् यत् 'इण्डिया' मैत्रीकूटस्य तिस्रः मुख्याः याचनाः सन्ति। यासु प्रथमा मुख्या याचना अस्ति यत् मुख्य- निर्वाचन- आयुक्तः ज्ञानेशकुमारः त्यागपत्रं दद्यात् सः च कारागारं प्रेषणीयः। एतदतिरिच्य एसआईआर इति प्रक्रिया स्थगिता क्रियेत, २०२९ तमस्य वर्षस्य लोकसभानिर्वाचनं पत्रमतैः (बैलेट-पेपर-माध्यमेन) कारयेत्। तया आरोपः कृतः यत् दलित- निर्धनजनानां मताधिकारपत्राणि (मतानि) कर्तयितुं कार्यं विहितम्। अल्का-लाम्बा पक्षं कृतवती यत् त्रयोदशकोटिः जनान् अनुप्रवेशकारिणः उक्त्वा तेषां मतानि निष्कासितानि। तया प्रश्नः उत्थापितः यत् यदि अनुप्रवेशकारिणः देशे प्रविष्टाः, तर्हि अस्य उत्तरदायित्वं कस्य? तया केन्द्रीयगृहमन्त्रिणः अमितशाहस्य अपि त्यागपत्रस्य याचना कृता। तया विज्ञापितं यत् सर्वकारः प्रथमे नवम्बर दिनाङ्के भविष्यमाणम् आन्दोलनं दमितुं प्रयतते।



आगरा-शिक्षकनिर्वाचनक्षेत्रस्य त्रिषु मतदानकेन्द्रेषु पुनर्मतदाने ५७.१६ प्रतिशतं मतदानम्

त्रिष्वपि मतदानकेन्द्रेषु शान्तिपूर्णतया निष्पक्षतया च सम्पन्नं पुनर्मतदानम्

हिमसंस्कृतवार्ताः वृजेश कुमार पाण्डेय

लखनऊम्, २६ अक्टूबर २०२६।

उत्तरप्रदेशस्य मुख्यनिर्वाचनाधिकारी श्रीनवदी-परिण्वा अवदत् यत् उत्तरप्रदेशविधानपरिषदः आगरा-शिक्षकनिर्वाचनक्षेत्रस्य त्रिषु मतदानकेन्द्रेषु सोमवासरे, २०२६ तमस्य वर्षस्य अक्टूबरमासस्य २६ दिनाङ्के पुनर्मतदानं शान्तिपूर्णतया निष्पक्षतया च सम्पन्नम्। निर्वाचननिर्वाहकाधिकारिभ्यः प्राप्तसूचनानुसारं त्रिषु मतदानकेन्द्रेषु समग्रं मतदानप्रतिशतं ५७.१६ प्रतिशतं जातम्।

मुख्यनिर्वाचनाधिकारी उक्तवान् यत् पुनर्मतदानप्रक्रियायां त्रिष्वपि मतदानकेन्द्रेषु मतदातृभिः स्वमताधिकारस्य प्रयोगः कृतः। मतदानकेन्द्रानुसारं मतदानप्रतिशतं निम्नलिखितम्—

१. मतदानकेन्द्रसंख्या-२० — खेरागढस्य तहसीलपरिसरे ५१.६० प्रतिशतं मतदानम् अभवत्।

२. मतदानकेन्द्रसंख्या-२१ — सैंयास्थिते क्षेत्रपञ्चायतकार्यालये ५८.२३ प्रतिशतं मतदानम् अभवत्।

३. मतदानकेन्द्रसंख्या-२६ — फतेहाबादस्थिते क्षेत्रपञ्चायतकार्यालये ५८.६५ प्रतिशतं मतदानम् अभवत्। मुख्यनिर्वाचनाधिकारी अवदत् यत् पुनर्मतदानस्य सम्पूर्णा प्रक्रिया सुव्यवस्थितरूपेण शान्तिपूर्णतया निष्पक्षतया च सम्पन्ना। त्रिष्वपि मतदानकेन्द्रेषु मतदातृभिः उत्साहपूर्वकं स्वमताधिकारस्य प्रयोगः कृतः।

— कार्यालयः मुख्यनिर्वाचनाधिकारी, उत्तरप्रदेशः

भारतीयकालगणना शोधकर्तृभ्यः एकः अनुपमः अवसरः– डॉ. अतुलवैद्यः





कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालये एकविंशति-दिवसीयायाः (२१) ज्योतिर्विज्ञान-कार्यशालायाः समापनम्

हिमसंस्कृतवार्ताः- डॉ. रेणुका बोकारे नागपुरम्।कविकुलगुरु- कालिदास- संस्कृत-विश्वविद्यालयस्य (रामटेकम्) वेदाङ्ग- ज्योतिष-विभागेन आयोजितायाः एकविंशतिदिवसीयायाः (२१) ज्योतिर्विज्ञान-कार्यशालायाः समापनम् अभवत्। वेदाङ्गज्योतिषस्य मूलभूत-अवधारणाभिः, तस्य विविध-उपयोगैः, भारतीय-कालगणनापद्धतेः महत्त्वेन च छात्रान् परिचाययितुम् अस्याः कार्यशालायाः प्रमुखम् उद्देश्यम् आसीत्।समापनसत्रे श्रीलङ्कादेशस्य कैप्टन हर्ष कोरेलाच्ची- महोदयः मुख्यातिथिरूपेण उपस्थितः आसीत्। कार्यक्रमस्य अध्यक्षता विश्वविद्यालयस्य माननीयैः कुलगुरुभिः डॉ. अतुलवैद्य-महोदयैः कृता। मञ्चे कुलसचिवः डॉ. रोशन अलोने, अधिष्ठात्री प्रो. ललिता चन्द्रात्रे, प्रो. कविता होले, प्रो. हरेकृष्ण अगस्ती, कार्यशालायाः संयोजकः प्रो. प्रसाद गोखले इत्येतेषां विशेषोपस्थितिः आसीत्।कार्यशालायाः संयोजकः प्रो. प्रसादगोखले स्व- प्रास्ताविक- भाषणे विज्ञापितवान् यत् अस्यां २१ दिवसीयायां कार्यशालायां ५५ छात्राः साफल्येन प्रशिक्षणं पूर्णवन्तः। इयं सहभागिता ज्योतिर्विज्ञानं भारतीयज्ञानपरम्परां च प्रति छात्रेषु प्रवर्धमानाम् अभिरुचिं प्रदर्शयति। मुख्यातिथिः कैप्टन हर्ष कोरेलाच्ची स्वविचारान् प्रकटयन् प्रावोचत् यत् महाकविना कालिदासेन मेघमाध्यमेन सन्देशप्रेषणस्य या कल्पना कृता, सा 'क्लाउड-मैसेंजर' इति अवधारणायाः दृष्टान्तरूपेण द्रष्टुं शक्यते। सः क्लाउड इत्येतं सूचनासङ्ग्रहस्य माध्यमरूपेण वायुं च सन्देशसम्प्रेषणस्य साधनरूपेण उपस्थापयन् अवदत् यत् कालिदासः प्रायः द्विसहस्रवर्षेभ्यः पूर्वं स्वकीयया काव्यात्मककल्पनया सञ्चारस्य एताम् अवधारणां प्रकटितवान् आसीत्। अद्य स एव विचारः सन्देशप्रेषणस्य प्राप्तेश्च आधुनिकप्रविधिषु विविधरूपेषु दृश्यते; दूरभाषः, ई-पत्रं, दृश्य-श्रव्य- गोष्ठी च अस्य आधुनिकानि उदाहरणानि सन्ति। सः मेघं सञ्चारस्य एकं तटस्थमाध्यमम् अपि प्रतिपादितवान्। अध्यक्षीयभाषणे कुलपतिः डॉ. अतुलवैद्यः अवदत् यत् ज्योतिषं विज्ञानं शास्त्रं चास्ति, किन्तु अस्य अध्ययनाय आध्यात्मिकः आधारः मनसः शुद्धता च अपि आवश्यकी वर्तते। तेनोक्तं यत् भारतीय- कालगणना शोधकर्तृभ्यः एकः अनुपमः अवसरः अस्ति। राहु-केतु-नेपच्यून (वरुण) सदृशेषु विषयेषु अधिकानुसन्धानस्य आवश्यकता वर्तते। सः अग्रे अवदत् यत् कार्यशालायां सम्प्राप्तज्ञानस्य आधारेण छात्रैः निरन्तरम् अध्ययनं, चिन्तनम्, अनुसन्धानं च करणीयम्। ज्योतिषशास्त्रं, विशेषतः कालगणना, गणिते आधारिता वर्तते। सौरगणना, चन्द्रगणना, तिथिक्षयः, तिथिलोपः, अधिकमासश्च सदृशाः अवधारणाः गणितीयसिद्धान्तेषु आधारिताः सन्ति। सः छात्रान् स्वोपार्जितज्ञानस्य सार्थकम् उपयोगं कुर्वद्भिः अस्मिन् क्षेत्रे गुणवत्तापूर्णं शोधकार्यं कर्तुं परामर्शं दत्तवान्।कार्यक्रमावसाने सर्वेभ्यः प्रतिभागीभ्यः छात्रेभ्यः प्रमाणपत्राणि समर्पितानि, सर्वेषाम् अतिथिव्याख्यातृणां च विशेषसम्मानः विहितः। अनुजशर्मणा कार्यक्रमस्य सञ्चालनं कृतम्, यदा तु डॉ. अम्बालिका-सेठिया-महोदयया कृतज्ञता प्रकटिता।



हिमसंस्कृतवार्ताः, ईदरधीरजः

वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। काश्मीर-धावन- स्पर्धायाम् एका विचित्रा घटना दृष्टा। कुलसुम-बानू-नामिकया मात्रा स्वबालकः हस्तयोः धृतः, सम्पूर्णा स्पर्धा च धाविता।

काव्या- नमस्ते नन्दिनि। अहो, तया मात्रा अतीव कष्टं सोढम्! कर्णाटक-राज्ये अपि एकेन बालेन महद् आश्चर्यं जनितम्। द्विवर्षीयेन बालेन तबलावाद्ये द्वादश-पारम्परिक-तालाः वादिताः, कीर्तिमानं च स्थापितम्।

नन्दिनी- सत्यम्, तेन बालेन अतीव कौशलं प्रदर्शितम्। अन्यदेकं वैद्यकीयम् आश्चर्यं चीन-देशे जातम्। एका महिला सप्तदश-वर्षाणि यावत् मूर्च्छिता स्थिता। तस्याः श्वश्वा निरन्तरं सेवा कृता। अनया सेवया सा स्नुषा प्रबोधिता।

काव्या- अद्भुतम्, तया श्वश्वा महान् स्नेहः दर्शितः। ओडिशा-राज्ये अपि वानरेण महान् स्नेहः दर्शितः। एकेन वन्य-वानरेण आपणः प्रविष्टः। तेन आपणिकः केवलम् आलिङ्गितः, कापि हानिः न कृता।

नन्दिनी- आम्, तेन वानरेण सर्वेषां मनांसि जितानि। अद्य एतावदेव। कृतज्ञताम् अर्पयामि।

भूगोल-विज्ञान-सम्बद्धानि दशरोचकतथ्यानि

१. नीलग्रहस्य जलव्याप्तिः: पृथिव्याः सम्पूर्णस्य पृष्ठभागस्य प्रायः एकसप्ततिप्रतिशतं (७१%) भागं जलेन आवृतम् अस्ति, यस्मात् कारणात् अन्तरिक्षात् इयं 'नीलग्रहः' इति दृश्यते।

२. सौरमण्डलस्य विशालतमः ज्वालामुखीः मङ्गलहeadग्रहे (Mars) स्थितः 'ओलम्पस् मोन्स्' (Olympus Mons) नामकः ज्वालामुखी सौरमण्डलस्य विशालतमः ज्वालामुखी अस्ति, यस्य औन्नत्यं पृथिव्याः एवरेस्ट-पर्वतात् प्रायः त्रिगुणं वर्तते।

३. सूर्यप्रकाशस्य यात्राकालः: सूर्यस्य प्रकाशः पृथिवीं प्राप्तुं प्रायः अष्टौ निमेषाः विंशतिः विपलाः (८ निमेषाः २० क्षणाः) यावत् समयं गृह्णाति।

४. वृक्षाणां प्राणवायुप्रदानम्: पृथिव्यां विद्यमानस्य प्राणवायोः (Oxygen) प्रायः विंशतिप्रतिशतं (२०%) भागं केवलं दक्षिण-अमेरिकाखण्डे स्थितं 'अमेज़न्' नामकं महावनं जनयति, अत एव एतत् 'पृथिव्याः फुफ्फुसम्' इति कथ्यते।

५. विशालतमः निर्जल-मरुभूमिः: अण्टार्कटिका-महाद्वीपः विश्वस्य विशालतमः शीत-मरुस्थलः मन्यते, यत्र पृथिव्याः प्रायः नवतिप्रतिशतं (९०%) हिमं सुरक्षितं विद्यते।





डॉ रेणुका बोकारे माध्यमसमन्वयिका ५२ तमम् अखिलभारतीय- प्राच्यविद्यासम्मेलनम्

अखिलभारतीय-प्राच्यविद्या-सम्मेलनोन्मेषाः प्राच्यमनीषा-मन्थनम् IOC-तः AIOC पर्यन्तम् धारावाहिकम्..... ८

अखिलभारतीय- प्राच्यविद्या- सम्मेलनस्य (AIOC) एकचत्वारिंशत्तमं (४१) समारभ्य एकपञ्चाशत्तमं (५१) यावत् अधिवेशनानि

हिमसंस्कृतवार्ताः- डॉ मनोजशैलः।

शताब्दिव्यापिन्याः ज्ञानपरम्परायाः अनुवर्तनम्-

प्राच्यविद्यायाः, संस्कृतसाहित्यस्य, भारतीयदर्शनस्य, विविधज्ञानशाखानां संरक्षण- संवर्धनयोः अखिलभारतीय- प्राच्यविद्या- सम्मेलनं शताब्दाः अपि अधिककालात् एकस्य जाग्रतः बौद्धिकप्रहरीरूपेण कार्यं कुर्वद् अस्ति। १९१९ तमे वर्षे शिमलायाः शीतलशैलेषु सर आर. जी. भाण्डारकर- महाभागस्य पावनसङ्कल्पैः प्रारब्धा इयं विद्वत्परम्परा अद्यापि अविच्छिन्नरूपेण प्रवहति। अस्मिन् अन्तिमे भागे वयं सम्मेलनस्य एकचत्वारिंशत्तमात् (४१) समारभ्य एकपञ्चाशत्तमं (५१) यावत् सम्भूतानाम् अधिवेशनानाम् ऐतिहासिकं वृत्तम् अवलोकयामः-

ऐतिहासिक-अधिवेशनानां विवरणम्

एकचत्वारिंशत्तमम् (४१) अधिवेशनम्, पुरी– २००२
अध्यक्षः– प्रो. विद्यानिवासमिश्रः
द्विचत्वारिंशत्तमम् (४२) अधिवेशनम्, वाराणसी– २००४
अध्यक्षः– प्रो. के. के. चतुर्वेदी
त्रिचत्वारिंशत्तमम् (४३) अधिवेशनम्, जम्मू– २००६
अध्यक्षः– प्रो. अभिराज राजेन्द्रमिश्रः

महत्त्वपूर्णः परामर्शः- पुरस्कारप्रदानप्रक्रियायाः सन्दर्भे सदस्यैः इदं मतं प्रकटितं यत् पुरस्कारार्थं प्रस्तौतव्यस्य शोधपत्रस्य सम्बद्धे सत्रे प्रस्तुत्यनन्तरमेव पुरस्कारप्रदानस्य निर्णयः स्वीकर्तव्यः।

चतुश्चत्वारिंशत्तमम् (४४) अधिवेशनम्, कुरुक्षेत्रम्– २००८
अध्यक्षः- प्रो. सतीशचन्द्रझा
पञ्चचत्वारिंशत्तमम् (४५) अधिवेशनम्, तिरुपतिः– २०१०
अध्यक्षः– प्रो. सत्यव्रतशास्त्री
षट्चत्वारिंशत्तमम् (४६) अधिवेशनम्, कश्मीरः– २०१२
अध्यक्षः– माननीयः जे. बी. पटनायकः

महत्त्वपूर्णः प्रस्तावः- अस्मिन् अधिवेशने 'एकः जनः, एकं पदम्' (एक व्यक्ति, एक पद) इति सिद्धान्तम् अङ्गीकृत्य सम्मेलनस्य आगाम्यधिवेशनात् एतत् प्रवर्तयितुं प्रस्तावः पारितः। अस्य सिद्धान्तस्यानुसारम् अखिलभारतीय- प्राच्यविद्या- सम्मेलनस्य कस्मिंश्चिद् एकस्मिन् अधिवेशने कोऽपि जनः केवलम् एकमेव पदं वोढुं शक्ष्यति; अर्थात् सः वा तु सम्मेलनस्य कार्यकारणीसमितेः सदस्यः भविष्यति अथवा कस्यचिद् विभागीयसत्रस्य अध्यक्षः भविष्यति। एकस्मिन्नेव अधिवेशने पदद्वये कार्यकरणाय अनुमतिः न स्यात्।

सप्तचत्वारिंशत्तमम् (४७) अधिवेशनम्, गुवाहाटी- २०१४
अध्यक्षः– प्रो. राधावल्लभत्रिपाठी
अष्टचत्वारिंशत्तमम् (४८) अधिवेशनम्, हरिद्वारम्– २०१६
अध्यक्षः– प्रो. महावीर अग्रवालः
एकोनपञ्चाशत्तमम् (४९) अधिवेशनम्, वेरावलम्– २०१८
अध्यक्षः– प्रो. चन्द्रकान्तशुक्लः
पञ्चाशत्तमम् (५०) अधिवेशनम्, नागपुरम्– २०२०
अध्यक्षः– प्रो. गौतमपटेलः
एकपञ्चाशत्तमम् (५१) अधिवेशनम्, उडुपी- २०२४
अध्यक्षः– प्रो. सरोजा-भाटे

निष्कर्षः- भाविनः द्विपञ्चाशत्तमस्य (५२) अधिवेशनस्य अपेक्षाः एकपञ्चाशत्सु अधिवेशनेषु प्रवृत्ता इयं ज्ञानयज्ञयात्रा अधुना स्वकीयं द्विपञ्चाशत्तमं (५२) सोपानं प्रवेष्टुम् उद्यता अस्ति। २०२६ तमस्य वर्षस्य अक्तूबर-मासे पतञ्जलि-विश्वविद्यालये हरिद्वारे आयोज्यमानम् इदं ५२-तमम् अधिवेशनं न केवलं भूतकालस्य उपलब्धेः उत्सवः, अपि तु भारतीयज्ञानपरम्परायाः भविष्यदृष्ट्या सह समन्वयाय एका महती आशा वर्तते। साम्प्रतिके युगे यदा जगत् कृत्रिमबुद्धेः,आधुनिकविज्ञानस्य , पर्यावरणसङ्कटस्य च नूतनैः प्रत्यह्वानैः युध्यते, तदा एतत् सम्मेलनं वेदानां, दर्शनस्य, आयुर्वेदस्य, योगस्य च शाश्वतदृष्ट्या समकालीन-समस्यानां समाधानानि अन्वेष्टुं समर्थं भविष्यति इति विदुषां दृढापेक्षा वर्तते। परम्परायाः आधुनिकतायाश्च अयम् अपूर्वः सङ्गमः भारतीयज्ञानपरम्परां पुनः वैश्विकस्तरे सर्वोपरि प्रतिष्ठापयिष्यति इति शम्।

"संस्कृत कथा मञ्जरी" {३८} (१) ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

"अथ पुत्तलिका-शापमोचनं नाम द्वात्रिंशोपाख्यानम्"

पुनरपि राजा सिंहासने यावदुपविशति तावदन्या पुत्तलिका भणति- भो राजन्! अस्मिन् सिंहासने विक्रमार्के एव उपवेष्टुं क्षमः, नान्यः, तस्य वक्रमस्य सदृशो राजा भूमण्डले नास्ति। यः काष्ठमयेन खड्गेन पृथिवीमध्ये भ्रमन् सर्वान् पृथ्वीधरान् विजित्य एकच्छत्रेण राज्यमकरोत्, यो हि अन्येषां शङ्का निराकृत्य आत्मनः शङ्कां प्रावर्त्तयत्। भूमण्डले यावन्तो राजानः सन्ति, तेषां सर्वेषां वशीकरणमन्त्रः प्रयुक्तः। समस्तान् दुर्जनजनान् निष्काश्य याचकानां दारिद्र्यं मोचयित्वा, दुर्भिक्षदुःखादीन् निवार्य्य च विक्रमेण पृथिवी पालिता। अतो विक्रमसदृशो राजा नास्ति। एवम् औदार्य्यादयो गुणास्त्वयि विद्यन्ते यदि, तर्हि अस्मिन् सिंहासने समुपविश। तत् श्रुत्वा राजा भोजस्तूष्णीमासीत्। पुनरपि द्वात्रिंशत्पुत्तलिका भोजराजमब्रवीत्- भो भोजराज! विक्रमादित्यो राजा तथाविधः, त्वमपि सामान्यो न, युवां द्वौ नरनारायणावतारधारिणौ, तस्मात् त्वतः परमपवित्रचरित्रः, सकलकलाप्रवीणः, औदार्य्यगुणविशिष्टो राजा वर्त्तमानसमये नास्ति। तव प्रसादात् अस्माकं द्वात्रिंशत्पुत्तलिकानां पापक्षयो जातः, शापात् विमुक्तिरपि जाता। भोजेनोक्तं- तत् कथय शापस्य वृत्तान्तम्।पुत्तलिका अवदत्- श्रूयतां राजन्! द्वात्रिंशत् सुराङ्गनाः पार्वत्याः नर्तक्यः, तस्याः परमप्रेमस्पदीभूताच्च [अनुत्तमस्नेहभागिन्यः] आसन्। प्रत्येकं नामधेयानि श्रूयन्ताम्- (१) मित्रकेशी (२) प्रभावती (३) सुप्रभा (४) इन्द्रसेना (५) सुदत्ती (६) अनङ्गनयना (७) कुरङ्गनयना (८) लावण्यवती (९) कामकालिका (१०) चण्डिका (११) विद्याधरी (१२) प्रज्ञावती (१३) जनमोहिनी (१४) विद्यावती (१५) निरुपमा(१६) हरिमध्या (१७) मदनसुन्दरी (१८) विलासरसिका (१९) श्रृङ्गारकलिका (२०) मन्मथसञ्जीवनी (२१) रतिलीला (२२) मदनवती (२३) चित्ररेखा (२४) सुरतगहरा (२५) प्रियदर्शना (२६) कामोन्मादिनी (२७) सुखसागरा (२८) शशिकला (२९) चन्द्ररेखा (३०) हंसगामिनी (३१) कामरसिका (३२) उन्मादिनी च। क्रमशः.....

डा. वर्षा प्रकाश टोणगांवकर®© पुणे, महाराष्ट्रम्



पति-पत्नी-हास्यकणिका

पत्नी (कोपपूर्णस्वरेण): "श्रूयताम्! यदि अहं म्रिये, तर्हि भवान् किं करिष्यति? किं द्वितीयं विवाहं करिष्यति?"

पतिः (गम्भीरतया): "नैव प्रिये! कदापि न! एकवारं कृतायाः त्रुट्याः शिक्षा पर्याप्तैव... मनुष्यः वारं वारं मूर्खः न भवति!"

(ततः परं पतिः त्रयः दिनानि यावत् पाकशालायां स्वयं भोजनं पचन् अस्ति...)

आधुनिकहिन्दीपत्रकारितायाः पुरोधसः पत्रकाराः

सत्यनिष्ठा, निर्भीकता,

जनसेवा च पत्रकारितायाः मूलाधाराः

- वृजेशकुमारपाण्डेयः

भारतीयस्वातन्त्र्यसङ्ग्रामे हिन्दी-पत्रकारितायाः महत्त्वपूर्णं योगदानम् आसीत्। तस्मिन् काले अनेकैः पत्रकारैः स्वकीयलेखनी-माध्यमेन जनजागरणं कृतम्। ब्रिटिशशासनस्य दमनकारीनीतीनां विरोधः कृतः, राष्ट्रभक्तेः भावनायाः प्रसारः च विहितः। बाबूरावविष्णुपराडकरः, गणेशशङ्करविद्यार्थी, पण्डितः दशरथ-प्रसादद्विवेदी, माखनलालचतुर्वेदी, पण्डितकमलापतित्रिपाठी चेत्येते पत्रकाराः हिन्दीपत्रकारितायाः इतिहासे विशिष्टं स्थानं धारयन्ति।



बाबूरावविष्णुपराडकरः

बाबूरावविष्णुपराडकरः हिन्दी-पत्रकारितायाः प्रमुखेषु पुरोधस्सु अन्यतमः आसीत्। तेन हिन्दीभाषायाः विकासे, सम्पादकीयलेखनस्य समृद्धौ, पत्रकारितायाः भाषाशैल्याः परिष्कारे च महत्त्वपूर्णं योगदानं प्रदत्तम्। सः वाराणसीतः प्रकाशितस्य 'आज' इति दैनिकसमाचारपत्रस्य सम्पादकरूपेण प्रसिद्धिम् अलभत। तस्य लेखनस्य प्रमुखमुद्देश्यम् आसीत्- जनसामान्यं राष्ट्रियसामाजिकविषयेषु जागरूकं कर्तुम्।तस्य जीवनात् पत्रकारैः भाषायाः शुद्धता, विचाराणां स्पष्टता, तथ्याधारितं लेखनं जनहितस्य च संरक्षणं शिक्षितव्यम्।



गणेशशङ्करविद्यार्थी

गणेशशङ्करविद्यार्थी निर्भीकः पत्रकारः, समाजसेवकः, स्वातन्त्र्यसेनानी च आसीत्। तेन १९१३ तमे वर्षे 'प्रताप' इति हिन्दीसमाचारपत्रस्य प्रकाशनम् आरब्धम्। अस्य पत्रस्य माध्यमेन सः कृषकाणां, श्रमिकाणां, पीडितानां तथा वञ्चितवर्गाणां समस्याः प्रमुखतया प्रस्तुतवान्।

सः अन्यायस्य शोषणस्य च विरुद्धं निर्भीकतया लेखनम् अकरोत्। १९३१ तमे वर्षे कानपुरनगरे साम्प्रदायिकहिंसायाः समये जनानां रक्षणाय शान्तिस्थापनाय च प्रयत्नशीलः सन् सः प्राणान् अत्यजत्। तस्य जीवनं पत्रकारितायाः मानवीयमूल्यानां सामाजिकसौहार्दस्य च प्रेरणादायकम् उदाहरणम् अस्ति।



पण्डितदशरथप्रसादद्विवेदी

पण्डितदशरथप्रसादद्विवेदी पूर्वाञ्चलस्य प्रमुखेषु पत्रकारेषु अन्यतमः आसीत्। तेन १९१९ तमे वर्षे गोरखपुरतः 'स्वदेश' इति हिन्दीसमाचारपत्रस्य प्रकाशनम् आरब्धम्। अस्य पत्रस्य माध्यमेन स्वातन्त्र्यसङ्ग्रामस्य विचाराणां राष्ट्रियचेतनायाश्च प्रचारः अभवत्। तेन पत्रकारितां राष्ट्रजागरणस्य सामाजिकपरिवर्तनस्य च प्रभावशालिनं माध्यमं कृतम्। तस्य प्रयासैः पूर्वाञ्चलस्य जनसामान्ये राष्ट्रियभावनायाः प्रसारे महत्त्वपूर्णा भूमिका निर्व्यूढा। तस्य जीवनात् ज्ञायते यत् पत्रकारितायाः प्रभावः महानगरेषु एव सीमितः न भवेत्। ग्रामीणजनानां, कृषकाणां, शिक्षकाणां, श्रमिकाणां च समस्याः समाचारपत्रेषु उचितं स्थानं प्राप्नुयुः।



पण्डितमाखनलालचतुर्वेदी

पण्डितमाखनलालचतुर्वेदी प्रसिद्धः कविः, साहित्यकारः, पत्रकारः, स्वातन्त्र्यसेनानी च आसीत्। सः 'एकभारतीयात्मा' इति नाम्ना अपि प्रसिद्धः आसीत्। तेन 'प्रभा' तथा 'कर्मवीर' इत्यादीनां पत्रपत्रिकाणां माध्यमेन राष्ट्रभक्तेः, स्वातन्त्र्यस्य, सामाजिकचेतनायाश्च प्रचारः कृतः। तस्य साहित्ये राष्ट्रप्रेम, मानवीयसंवेदना, त्यागः, समर्पणं च प्रमुखतया दृश्यन्ते। तेन साहित्यं पत्रकारिता च जनजागरणस्य साधने इति प्रतिपादितम्। तस्य प्रसिद्धायाः 'पुष्प की अभिलाषा' इति कवितायाः भावः राष्ट्रसेवायां समर्पणस्य प्रेरणां ददाति। आधुनिकपत्रकारैः तस्मात् भाषायाः गरिमा, विचाराणां गाम्भीर्यं, समाजस्य प्रति संवेदनशीलता च शिक्षितव्या।



पण्डितकमलापतित्रिपाठी

पण्डितकमलापतित्रिपाठी पत्रकारः, साहित्यकारः, स्वातन्त्र्यसेनानी, राजनीतिज्ञः च आसीत्। तेन हिन्दीपत्रकारितायाः विकासे महत्त्वपूर्णं योगदानं प्रदत्तम्। सः दैनिक 'आज' इत्यस्य सम्पादकीयविभागे कार्यम् अकरोत् तथा 'संसार' इत्यादीनां समाचारपत्राणां सम्पादनकार्ये अपि योगदानम् अददात्। तस्य पत्रकारितायां साहित्यिकदृष्टेः, राजनीतिकज्ञानस्य, सामाजिक-दायित्वस्य च समन्वयः दृश्यते। अनन्तरं सः उत्तरप्रदेशस्य मुख्यमन्त्री अपि अभवत्। तस्य जीवनात् पत्रकारैः सार्वजनिकविषयाणाम् अध्ययनं, तथ्याधारितं विश्लेषणं, जनहितस्य संरक्षणं, उत्तरदायित्वपूर्णं लेखनं च शिक्षितव्यम्।

आधुनिकपत्रकारितायाः समक्षं वर्तमानानि आह्वानानि

अद्यतनकाले विज्ञानस्य प्रौद्योगिक्याश्च विकासेन समाचारप्रसारणं अत्यन्तं तीव्रं जातम्। अन्तर्जालस्य, सामाजिकमाध्यमानां, दूरदर्शनस्य च माध्यमेन समाचाराः क्षणमात्रेण जनसामान्यं प्राप्नुवन्ति। तथापि असत्यसूचनानां प्रसारः, अपुष्टसमाचाराणां प्रकाशनम्, अतिरञ्जितशीर्षकानि, पक्षपातपूर्णं प्रस्तुतिकरणं च पत्रकारितायाः समक्षं गम्भीराणि आह्वानानि सन्ति।

अतः प्रत्येकस्य पत्रकारस्य कर्तव्यम् अस्ति यत् सः समाचारप्रकाशनात् पूर्वं तथ्यानां सत्यापनं कुर्यात्, सम्बन्धितपक्षाणां विचारान् जानीयात्, निष्पक्षतां पालयेत् तथा सामाजिकसौहार्दस्य संरक्षणे योगदानं दद्यात्। पत्रकारिता केवलं घटनानां विवरणप्रस्तुतिः नास्ति, अपि तु जनसामान्यं सत्येन, प्रमाणैः, विवेकपूर्णविचारैः च परिचाययितुं महत्त्वपूर्णं माध्यमम् अस्ति।

पत्रकारितायाः मूल-भूतानि सिद्धान्तानि

पत्रकारैः निम्नलिखितानि मूल्यानि सर्वदा पालनीयानि-

१. सत्यस्य अन्वेषणं तथ्याणां च सत्यापनम्।
२. अन्यायस्य विरुद्धं निर्भीकतया लेखनम्।
३. पीडितानां वञ्चितानां च समस्याणां प्रकाशनम्।
४. भाषायाः शुद्धतायाः मर्यादायाश्च संरक्षणम्।
५. समाचारस्य विचारलेखस्य च भेदस्य स्पष्टता।
६. धार्मिकसामाजिकसौहार्दस्य संरक्षणम्।
७. जनहितस्य सार्वजनिकदायित्वस्य च निर्वहणम्।
८. त्रुटेः ज्ञाने सति तस्य संशोधनम्।

उपसंहारः

बाबूरावविष्णुपराडकरः हिन्दीपत्रकारितायाः भाषिकं सम्पादकीयञ्च स्वरूपं समृद्धवान्। गणेशशङ्करविद्यार्थी निर्भीकतायाः, जनसेवायाः, मानवीयतायाश्च आदर्शं प्रस्तुतवान्। दशरथप्रसादद्विवेदी पूर्वाञ्चले राष्ट्रियचेतनायाः प्रसारे महत्त्वपूर्णं योगदानम् अकरोत्। माखनलालचतुर्वेदी साहित्यं पत्रकारिता च राष्ट्रजागरणेन सह सम्बद्धवान्। कमलापतित्रिपाठी पत्रकारितायाः, साहित्यस्य, सार्वजनिकजीवनस्य च क्षेत्रेषु महत्त्वपूर्णां भूमिकाम् निर्वहन् आसीत्। एतेषां महानां पत्रकाराणां जीवनं वर्तमानपत्रकारेभ्यः प्रेरणां ददाति यत् पत्रकारितायां सत्यनिष्ठा, निष्पक्षता, निर्भीकता, मानवीयसंवेदना, जनहितं च सर्वोपरि भवेत्।

कालः परिवर्तते, सञ्चारमाध्यमानि परिवर्तन्ते, किन्तु सत्यस्य प्रतिष्ठा, प्रमाणानां सम्मानः, समाजस्य प्रति उत्तरदायित्वं च पत्रकारितायाः शाश्वतमूल्यानि सन्ति। महान् पत्रकारः स एव, यः स्वलेखन्या समाजं जागरयति, अन्यायस्य विरुद्धं स्वरम् उत्थापयति, सत्यं प्रतिष्ठापयति, जनसामान्यस्य हिताय च निरन्तरं कार्यं करोति।